

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय
ग्रंथालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. 11 वर्गांक ज्योतिष्य
नांव - प्रातःकाल कार
लेखक/लिपिकार ..... पृष्ठ 21
काळ ..... पूर्ण/अपूर्ण १३-१५ पृष्ठ गहाळ

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय
ग्रंथालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. 12 वर्गांक पूजा
नांव - गुरुपूजा पद्धती
लेखक/लिपिकार ..... पृष्ठ 14
काळ संवत २०१० पूर्ण/अपूर्ण .....

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय
ग्रंथालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. 13 वर्गांक स्तोत्र
नांव - श्रीलडुक भैरव स्तोत्र
लेखक/लिपिकार ..... पृष्ठ 13
काळ ..... पूर्ण/अपूर्ण .....

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीबटुकभैरवस्तोत्रप्रारंभः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमःश्रीसरस्वतीयेनमः श्रीगुरुभ्योनमः
श्रीकुळदेवतायेनमः श्रीमातापिताभ्यांनमः श्री
बटुकभैरवायनमः मेरुपृष्ठसुखासीनंदेवदेवंजगद्गु
रुं शंकरंपरिप्रच्छपार्वतीपरमेश्वरं १ पार्वत्युवाच
भगवन्सर्वधर्म्मज्ञसर्वशास्त्रागमादिषु आपदुद्धार
णंमंत्रंसर्वसिद्धिप्रदंनृणां २ सेवकानांचैवभूतानां १

हितार्थंवांछितंमया विशेषतस्तुराज्ञांवैशांतिपुष्टिप्र
साधनं ३ अंगन्यासकरन्यासदेहन्याससमन्वितं
वक्तुमर्हसिदेवेशममहर्षेविवर्द्धनं ४ ईश्वरउवाच
शृणुदेविप्रवक्ष्यामिआपदुद्धारहेतुकं सर्वदुःखप्रश
मनंसर्वशत्रुविनाशनं ५ अपस्मारादिरोगाणांज्वरा
दीनांविशेषतः नाशनंस्मृतिमात्रेण मंत्रराजमिमंप्रिय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रहराजभयानांवनाशनंसुखवर्द्धनं स्नेहाद्वक्ष्यामितेमंत्र
सर्वसारमिमंशृणु ३ सर्वकामार्थदंनृणांराजभोगसुख
प्रदं आपद्धारणंमंत्रंप्रवक्ष्यामिविशेषतः ८ प्रण
वंपूर्वमुद्धृत्यदेवीप्रणवमुद्धरेत् बटुकायेतिवैपश्चा
दापदुद्धारणायच ९ कुरुद्वयंततःपश्चाद्बटुका
यपुनर्वदेत् देवीप्रणवमुद्धृत्यमंत्रोद्धारमिमंशृणु १०

२

मंत्रोद्धारमिमंदेवित्रैलोक्यानिडर्द्धमं अप्रकाश्यंपरं
गुह्यंसर्वशक्तिसमन्वितं ११ स्मरणादेवमंत्रस्यभूतप्र
तापिशाचका विद्रवंत्यतिभीतावैकालरुद्रादिवप्रजाः
१२ पठेद्वापाठयेद्वापिपूजयेद्वापिपुस्तकं नाग्निचौर
भयंतत्रग्रहराजभयंतथा १३ नवमारीभयंकिंचि
त्सर्वत्रसुखवान्भवेत् आयुरारोग्यमैश्वर्यंपुत्रपौत्रादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैपदः २४ भवंतिसततंतस्यपुस्तकस्यापिपूजनात् स
र्वकामार्थदंमंत्रंप्रवक्ष्यामिविशेषतः २५ श्रीपार्वत्युवाच
कथंभैरवोनामआपदुद्धारकोमतः त्वयावकथितो
देवभैरवकल्पमुत्तमं २६ तस्यनामसहस्राणिश्रुता
न्यर्बुदानिच सारमुद्धृत्येतांवैनामाष्टशतकंवद २७
यानिसंकीर्त्ययन्मर्त्यःसर्वदुःखविवर्जितः सर्वान् ३

कामानवाप्नोतिसाधकाःसिद्धिमेवच २८ ईश्वरउवाच
शृणुदेविप्रवक्ष्यामिभैरवस्यमहात्मनः आपदुद्धारक
स्येहनामाष्टशतमुत्तमं २९ सर्वपापहरंपुण्यंसर्वोपद्र
वनाशनं सर्वकामार्थदंदेविसाधकानांशुभावहं ३०
सर्वमंगलमांगल्यंसर्वोपद्रवनाशनं आयुःकरंपुष्टि
करंश्रीकरंजयशस्करं ३१ नामाष्टशतकस्यास्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दोनुष्टुप्प्रकीर्तितं बृहदारण्यको नामऋषिर्दैवाथभैरवः
२२ सर्वकामार्थसिद्धये विनियोगःप्रकीर्तितः भैरवंम
र्द्धिविन्यस्यललाटेभीमदर्शनं २३ नेत्रयोर्भूतहननं
सारमेयानुगंभ्रुवोः कर्णयोर्भूतनाथंवक्त्रेतवाहंकपाल
योः २४ नासापुटोष्ठयोश्चैवभस्मांगंसर्पभूषणं भ
नादिभूतमास्येवशक्तिहस्तंगलेन्यसेत् २५ स्कंध ५

यौर्दैत्यशमनंबाहोरकुलेतजसं पाण्योःकापालिनं
न्यस्यहृदयेमुंडमालिनं २६ शांतंवक्ष्यस्थलेन्यस्य
स्तनयोःकामचारिणं उदरेवसदाकुरुंक्षेत्रेशंपा
र्श्वयोस्तथा २७ क्षेत्रपालंपृष्ठदेशेक्षेत्रज्ञंनाभिदेश
के पापौघनाशनंकट्यांबटुकंलिंगदेशके २८ गुद
रक्षाकरंन्यस्यतथोर्ध्वारक्तलोचनं जानुनोर्घुघुरोवंशो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जंघयोरक्रपायिनं २९ गुह्ययोःपाडकासिद्धं पादयु
ष्मेसुरेश्वरं आपादमस्तकंवैवआपडुद्धारकंन्यसेत्
३० पूर्वेडमरुहस्तंचदक्षिणेदंडधारिणं स्व[redacted]हस्तंप
श्चिमायांघंठावादिनमुत्तरे ३१ आग्नेयामग्निवर्णं
चनैर्ऋत्यंचदिगंबरं वायवेसर्वभूतस्थमीशानेचा
ष्टसिद्धिदं ३२ ऊर्द्धेखवारिणंन्यस्यपातालेरौद्ररू ४

पिणं एवंविन्यस्यदेहेषुषडंगेषुततोन्यसेत ३३ हृ
दयेभूतनाथायआदिनाथायमुर्द्धनि आनंदपद
पूर्वायनाथायाथशिखासुच ३४ सिद्धसावरनाथा
यकवचेविन्यसेत्तथा सहजानंदनाथायन्यसेन्नेत्रत्र
योतथा ३५ निसीमानंदनाथायअस्त्रेचैवप्रयोज
येत् एवंन्यासविधिंकृत्वायथावत्तदनंतरं ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यानंतस्यप्रवक्ष्यामियथाध्यात्वापठेन्नरः शुद्धस्फाठ
कसंकाशंसहस्रादित्यवर्च्चसं २७ नीलजीमूतसं०काशं
नीलांजनसमप्रभं अष्टबाहुंत्रिनयनंचतुर्बाहुंद्विबा
हुकं २८ दंष्ट्राकरालवदनंनृपुरावसंकुलं भुजं
गमेखलंदेवमग्निवर्णशिरोरुहं २९ दिगंबरंकुमा
रीशंबटुकाख्यंमहाबलं खड्गांगमसिपाशंवश्

लंदक्षिणभागतः ४० डमरुंचकपालंचवेदैर्भुजगंत
था अग्निवर्णासमोपेतंसारमेयसमन्वितं ४१ ध्यात्वा
जपेसुसंतुष्टः सर्वान्कामानवाप्नुयात्॥ वंदेबालंस्फुटि
कसदृशंकुंतलोद्भासिवक्त्रं दिव्याकल्पैर्न्नवमणिम
यैः किंकणीनूपुराद्यैः दीप्ताकारंविशदवदनंसु
प्रसन्नंमहेशं हस्ताज्याभ्यांबटुकमनिशंशूलद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

डोद्धानं ४२ अथराजसंध्यानं उद्यन्मंडलसंनि
भंत्रिनयनंरक्तांगरागस्रजंस्मेराश्यंवरदंकपालम
भयंशूलंदधानंकरैः नीलग्रीवमुदारणयुतंशीतांशुखं
डोज्वलंबंधूकारुणवाससंभयहरंदेवंसदाभावये॥ अ
थमानसंध्यानं ध्यायेत्त्रैलोक्यकांतंशशिशकलधरंमु
डहारंमहेशंदिग्वस्त्रंपिंगकेशंडमरु मथ स्रणिरवङ्क

पाशाभयानि नागंघंठाकपालंकरशिरसिरुहंविभ्रतं
भीमदंष्ट्रंसर्पकिल्मात्रिनेत्रंमणिमयविलसत्किंकणीनूपरा
वैः ४३ करकलितकपालःकुंडलीडेंदपालिस्फुरणनिमि
रनीलमालयज्ञोपवीतिः क्रतुसमयसपर्याविघ्नविच्छेदहे
तुर्जीयतिबटुकनाथःसिद्धिदःसाधकानां ४४ अस्यबटु
कभैरवनामाष्टशतकस्यआपदुद्धारस्तोत्रमंत्रस्यबृहदारण्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कोऽर्षिः अनुष्टुप्छंदः श्रीभैरवोदेवता क्रींबीजं वटुका
येतिशक्तिः प्रणवःकीलकं अभीष्टसिद्ध्यर्थेजपेविनियोगः
ॐक्रांबांअंगुष्ठाभ्यांनमः ॐक्रींबींतर्ज्जनीभ्यांनमः ॐक्रूं
बूंमध्यमाभ्यांनमः ॐक्रैंवैंअनामिकाभ्यांनमः ॐक्रौंबौंक
निष्ठिकाभ्यांनमः ॐक्रः वः करतलकरपृष्ठाभ्यांनमः ॐक्रां
बों हृदयायनमः ॐक्रींबींशिरसेस्वाहा ॐक्रूंबुंशिखायैवौ ८

षट् ॐक्रैंवैंकवचायहुं ॐक्रौंबौंनेत्रत्रयायवौषट् ॐक्रः
वःअस्त्रायफट्॥अतीतीक्ष्णमहाकायकल्पांतोदहनोपमः
भैरवायेनमस्तुभ्यमनुज्ञांदातुमर्हसि ४५ शांतंपद्मासनस्थं
शशिमुकुटधरंभीमदंष्ट्रंत्रिनेत्रंशूलंखड्गंवज्रंपरशुंच
मुशलंदक्षिणांगेवहंतं नागंपाशंचघंटांनलिनकरयुतं
चांकुशंदामभोगेनागालंकारयुक्तंस्फाटिकमणिनिभंनोम्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हंत्रांशिवाख्यं ४६ अथमंत्र ॐक्रांबटुकायआपदुद्धार
णायकुरुकुरुबटुकायक्रींॐ अथनामानि भैरवोभूतना
थश्चभूतात्माभूतभावनः क्षेत्रज्ञःक्षेत्रपालश्चक्षेत्रदःक्षेत्रि
योविराट् ४७ श्मशानवासीमांसाशीखर्पराशीस्मरांतकः
रक्तपःपानपःसिद्धःसिद्धिदःसिद्धिसेवितः ४८ कंका
लःकालशमनःकलाकाष्ठातनुःकविः त्रिनेत्रोबहुनेत्र ९

श्चतथापिंगलोलोचनः ४९ जेभीकर्मैरवोभीमोभूतयोगि
नीपतिः शूलपाणिःखड्गपाणिःकंकालीधूम्रलोच
नः ५० धनदोधनहारीवधनवान्प्रतिभानुमान् नाग
हारोनागकेशोनागकेशःकपालभृत् ५१ कालःकपा
लमालीवकमनीयःकलानिधिः त्रिनेत्रोज्वलन्नेत्रस्त्रि
शिखीवत्रिलोपकः ५२ त्रिनेत्रतनयोजंभःशंभुःशंभुज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नग्नियः बटुकोबटुवेषश्चषट्वांगवरधारकः ५३ भूताध्यक्षः
पशुपतिर्भिक्षुकःपरिचारकः धूर्तोदिगंबरःशूरोहरिणःपां
डुलोचन ५४ प्रशांतःशांतिदःक्षुद्धःशंकरःप्रियबांधवः
अष्टमूर्तिर्निधीशश्चज्ञानचक्षुस्तपोमयः ५५ अष्टाधार
षडाधारःसर्पयुक्तःशिखीसखः भूधरोभूधराधीशोभूपति
र्भूधरात्मकः ५६ कपालधारीमुंडावलीतर्यज्ञोपवीतवान् १०

जृंभलोमोहनःस्तंभीमारणःक्षोभणस्तथा ५७ शुद्धोनीलां
जनःप्रखोदैत्यहासुंडभूषितः वलिभुग्वलिभुङ्नाथोबालो
बालपराक्रमः ५८ सर्वापत्तारणोदुर्गोदुष्टभूतनिसेवितः
कामीकलानिधिःकांतःकामिनीवशवैकृद्वशी ५९ सर्वसि
द्धिप्रदोवैद्यःप्रभुर्विष्णुरितिवाहि अशेषजगतांनाम्नांभैरव
स्यमहात्मनः ६० मयोक्तकथितंदेविरहस्यंसर्वकामदं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यइदं पठेत्स्तोत्रंनामाष्टशतमुत्तमं ६१ नतस्यदुरितंकिंचिं
न्नवभूतभयंतथा नवमारीभयंकिंचिद्भ्रहराजभयंतथा
६२ नशत्रुभ्योभयंकिंचित्स्मानुयान्मानवःक्वचित् पातका
नांभयंचैवपठेत्स्तोत्रमनुत्तमं ६३ मारीभयेराजभयेतथा
चौराग्निजेभये उत्पातेमहाघोरेतथाडुःस्वप्नजेभये ६४
बंधनेचतथाघोरेपठेत्स्तोत्रमनुत्तमं सर्वंप्रशममायाति ६५

भयंभैरवकीर्तनात् ६५ एकादशमहस्रंतुपुरश्चरणमुच्य
ते यस्त्रिसंध्यंपठेद्देविसंवत्सरेमनंदितः ६६ समसिद्धिंप्राप्नु
यादिष्टांडुर्लभामपिमानवः षण्मासाद्भूमिकामस्तुजापि
त्वाप्राप्नुयान्महीं ६७ राजशत्रुविनाशार्थंजपेन्मासाष्ट
कंयदि रात्रौवारत्रयंदेविनाशयत्येवशात्रवान् ६८
जपेन्मासत्रयंदेविवारमेकंतथानिशि धनंपुत्रांस्तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दारान्स्राप्नुयान्नात्रसंशयः ६९ रोगीरोगात्प्रमुच्येतब
द्धोमुच्येतबंधनात् भीतोभयात्प्रमुच्येतेदंविसत्यंनसं
शयः ७० निगडैश्चापियोबद्धःकाराग्रहनिपातितः
शृंखलाबंधनंप्राप्यपठेच्चैवदिवानिशि ७१ यानूया
नूप्रमीहतेकामांस्तांस्तान्प्राप्नोत्यसंशयं अनेकाश्चंप
रंगुह्यंनेदंयस्यकस्यचित् ७२ सुकुलीनायशांतायं ७३

ऋजवेदंप्रदातव्यं दद्याच्छ्रोत्रमिदंदेविसर्वकामफ
लप्रदम् ७३ भैरवोपिप्रहृष्टोभूत्प्रियंचपरमेश्वरः
योजपेत्परयाभक्त्यासदासर्वेश्वरेश्वरी ७४ एवंश्रुत्वा
ततोदेवीनामाष्टशतमुत्तमं संतोषंपरमंप्राप्यभैरवस्य
महात्मनः ७५ जजापपरयाभक्त्यातदासर्वेश्वरेश्वरी ७६
इतिश्रीरुद्रयामलेउत्तरखंडेउमामहेश्वरसंवादेबटुकभैर
वस्तोत्रंसंपूर्णमस्तु श्रीबटुकभैरवार्पणमस्तु श्रीभैरवायनमः
७ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बटुकभैरवस्तोत्रसभाष्यः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=01.08.19 11:32
,TRANSFERRED=2019/08/01 at 11:38:43
,PAGES=15
,TYPE=STD
,NAME=S0001215
,Book Name=M-13-SHRIBATUK BHAIRAV STOTRA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection